A-II/2/1406/22

तृतीयसत्रार्द्धम्

द्वितीयपत्रम्

नव्यन्यायः

समयः घण्टात्रयम् | पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. अनुमित्यर्थके धातुयोगे द्वितीयार्थः कः?
2. 'घटो नीलो भवती'त्यत्र नीलपदार्थस्य कुत्रान्वयः?
3. इच्छार्थकधातुस्थले द्वितीयार्थः कः?
4. कृतिप्रकारकपाकविशेष्यकेच्छायाः आकारः कः?
5. पाकं चिकीर्षतीत्यादौ सनः किं बोधकत्वम्?
6. नीलतरो घटः इत्यत्र तरबर्थस्य कुत्रान्वयः?
7. निर्वर्त्यं कर्म किम्?
8. मासमधीते इत्यत्र द्वितीया केन सूत्रेण?
9. मर्यादार्थकस्य यावच्छब्दस्य उदाहरणं लिखत।
10. यज्ञमनु प्रावर्षत् इत्यत्र अनुशब्दार्थः कः?
11. कारकविभक्तितृतीयायाः कोऽर्थः?

**अथवा**

चैत्रेण पक्वमित्यत्र कृतिः केन बोध्यते?

12. चैत्रेण ज्ञायते इत्यत्र तृतीयार्थः कः?

**अथवा**

'स्वतन्त्रः कर्ता' इत्यत्र विवक्षितं स्वतन्त्रत्वं किं रूपम्?

13. 'हलैः कृषति' इत्यत्र कृषिः किं बोधकः?

**अथवा**

'धनेन कुलम्' 'विद्यया यशः' इत्यादौ केन सूत्रेण तृतीया?

14. लिङ्गज्ञानस्यानुमितिकरणतामते धूमेन वह्निमनुमिनोतीत्यत्र धूमपदस्य कुत्र लक्षणा?

**अथवा**

'परे तु' मते धूमेन वह्निमनुमिनोतीत्यत्र तृतीया केन सूत्रेण तृतीयार्थश्च कः?

15. 'जाड्येन बद्धः' इत्यत्र केन सूत्रेण तृतीया?

**अथवा**

'जटाभिस्तापसः' इत्यत्र तृतीयाविधायकं सूत्रं किम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. अनुमित्यर्थकधातुयोगे वह्निमनुमिनोमीत्यादौ द्वितीयार्थं निरूपयत।

17. विनाशब्दसमभिव्याहारस्थले बोधं वर्णयत।

18. इच्छार्थकधातुस्थले द्वितीयार्थं निर्णयत।

**अथवा**

आचारार्थविहितक्यजन्तस्थले वाक्यार्थबोधं वर्णयत।

19. कारकतृतीयायाः आधेयत्वार्थकत्वं निरस्य कृतिवाचकत्वं स्थापयत।

**अथवा**

'काष्ठेन पच्यते' इत्यादि प्रयोगं स्वातन्त्र्यनिर्वचनपूर्वकम् साधयत ।

20. 'परे तु' मतेन धूमेनानुमिनोतीत्यादौ तृतीयामुपपादयत।

**अथवा**

'इत्थम्भूतलक्षणे' इति सूत्रस्याशयं वर्णयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. 'मासमधीते' इत्यत्र द्वितीयार्थवर्णनपूर्वकं वाक्यार्थं प्रतिपादयत।

**अथवा**

सहशब्दप्रयोगस्थले साहित्यबोधं यथाग्रन्थमुपपादयत।